# ०२. मंगलाष्टकम्

लक्ष्मीयर्स्य परिग्रहः कमलभूः सूनुर्गरुत्मान् रथः
पौत्रश्चंद्रविभूषणः सुरगुरुः शेषश्च शय्या पुनः।
ब्रहांडं वरमंदिरं सुरगणाः यस्य प्रभोः सेवकाः
सत्रैलॊक्यकुटुंबपालनपरः कुर्याद्ढरिर्मंगलं।१।

ब्रह्मावायुगिरीशशेषगरुडाः देवेंद्रकामौ गुरुः
चंद्रार्कौ वरुणानलौ मनुयमौ वित्तेशविघ्नेश्वरौ।
नासत्यौ निॠतिर्मरुद्गणयुताः पर्जन्यमित्रादयः
सस्त्रीकाः सुरपुंगवाः प्रतिदिनं कुर्वंतु नो मंगलम् ।२।

विश्वामित्रपराशरौर्वभृगवोऽगस्त्यः पुलस्त्यः क्रतुः
श्रीमानत्रि-मरीच्युचथ्यपुलहाः शक्तिर्वसिष्ठोऽंगिराः ।
मांडव्यो जमदग्निगौतम भरद्वाजादयस्तापसाः
श्रीमद्विष्णुपदांबुजैकशरणाः कुर्वंतु नो मंगलम् ।३।

मांधाता नहुषोऽंबरीषसगरौ राजा पृथुर्हैहयः
श्रीमान् धर्मसुतो नलो दशरथो रामो ययातिर्यदुः ।
इक्ष्वाकुश्च विभीषणश्च भरतश्चोत्तानपादध्रुवौ
इत्याद्या भुवि भूभुजश्च सततं कुर्वंतु नो मंगलम्।४।

श्रीमेरुर्हिमवांश्च मंदरगिरिः कैलासशैलस्तथा
माहेंद्रो मलयश्च विंध्यनिषधौ सिंहस्तथा रैवतः ।
सह्याद्रिर्वरगंधमादनगिरिर्मैनाकगोमंतकौ
इत्याद्या भुवि भूधराश्च सततं कुर्वंतु नो मंगलम् ।५।

गंगा सिंधुसरस्वती च यमुना गोदावरी नर्मदा

कृष्णा भीमरथी च फल्गुसरयू श्रीगंडकी गोमती ।
कावेरी कपिला प्रयागकिटिजा नेत्रावतीत्यादयो
नद्यः श्रीहरिपादपंकजभवाः कुर्वंतु नो मंगलम् ।६।

वेदाश्चोपनिषद्गणाश्च विविधाः सांगाः पुराणान्विता
वेदांता अपि मंत्रतंत्रसहितास्तर्काः स्मृतीनां गणाः ।
काव्यालंकृति नीतिनाटकयुताः शब्दाश्च नानाविधाः
श्रीविष्णोर्गुणनामकीर्तनपराः कुर्वंतु नो मंगलम् ।७।

आदित्यादिनवग्रहाः शुभकरा मेषादयो राशयो
नक्षत्राणि सयोगकाश्च तिथयस्तद्देवतास्तद्गणाः ।
मासाब्दा ऋतवस्तथैव दिवसाः संध्यास्तथा रात्रयः
सर्वे स्धावरजंगमाः प्रतिदिनं कुर्वंतु नो मंगलम् ।८।

इत्येतद्वरमंगलाष्टकमिदं श्रीराजराजेश्वरेणाऽख्यातं
जगतामभीष्टफलदं सर्वाशुभध्वंसनम् ।
मांगल्यादि-शुभक्रियासु सततं संध्यासु वा यः पठेत्
धर्मार्थादिसमस्तवांछितफलं प्राप्नोत्यसौ मानवः ।९।

तदेव लग्नं सुदिनं तदेव तारबलं चंद्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽंघ्रियुगं स्मरामि ।१०।

मंगलं भगवान्विष्णुर्मंगलं मधुसूदनः ।
मंगलं देवकी पुत्रो मंगलं गरुडध्वजः ॥

।।इति श्रीराजराजेश्वरतीर्थविरचितं मंगलाष्टकं संपूर्णम्॥